वसुदेवसुतं(न्) देवं(ङ्), कंसचाणूरमर्दनम्।
देवकीपरमानन्दं(ङ्), कृष्णं(वँ) वन्दे जगद्गुरुम् ॥

॥ गीता पढ़ें, पढ़ायें, जीवन में लायें ॥

गीता परिवार द्वारा श्रीमद्भगवद्गीता का शुद्ध उच्चारण सीखने हेतु
अनुस्वार, विसर्ग व आघात प्रयोग सहित चरणानुसार विभाग, मूल संहितापाठ के अनुकूल

# सरल पठनीय गीता ~ अष्टम (8वाँ) अध्याय

ॐ श्रीपरमात्मने नम:
श्रीमद्भगवद्गीता
अथाष्टमोऽध्याय:
अर्जुन उवाच

किं(न्) तद्ब्रह्म किमध्यात्मं(ङ्), किं(ङ्) कर्म पुरुषोत्तम।
अधिभूतं(ञ्) च किं(म्) प्रोक्तम्, अधिदैवं(ङ्) किमुच्यते॥1॥

अधियज्ञ:(ख्) कथं(ङ्) कोऽत्र, देहेऽस्मिन्मधुसूदन।
प्रयाणकाले च कथं(ञ्), ज्ञेयोऽसि नियतात्मभि:॥2॥

श्रीभगवानुवाच

अक्षरं(म्) ब्रह्म परमं(म्), स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो, विसर्ग:(ख्) कर्मसञ्ज्ञित:॥3॥

अधिभूतं(ङ्) क्षरो भाव:(फ्), पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र, देहे देहभृतां(वँ) वर॥4॥

अन्तकाले च मामेव, स्मरन्मुक्त्वा कलेवरम्।
य:(फ्) प्रयाति स मद्भावं(यँ), याति नास्त्यत्र संशय:॥5॥

यं(यँ) यं(वँ) वापि स्मरन्भावं(न्), त्यजत्यन्ते कलेवरम्।
तं(न्) तमेवैति कौन्तेय, सदा तद्भावभावित:॥6॥

Learngeeta.com

तस्मात्सर्वेषु कालेषु, मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिः(र्), मामेवैष्यस्यसंशयम्॥7॥

अभ्यासयोगयुक्तेन, चेतसा नान्यगामिना।
परमं(म्) पुरुषं(न्) दिव्यं(यँ), याति पार्थानुचिन्तयन्॥8॥

कविं(म्) पुराणमनुशासितारम्,
अणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपम्,
आदित्यवर्णं(न्) तमसः(फ्) परस्तात्॥9॥

प्रयाणकाले मनसाऽचलेन,
भक्त्या युक्तो योगबलेन चैव।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक्,
स तं(म्) परं(म्) पुरुषमुपैति दिव्यम्॥10॥

यदक्षरं(वँ) वेदविदो वदन्ति,
विशन्ति यद्यतयो वीतरागाः।
यदिच्छन्तो ब्रह्मचर्यं(ञ्) चरन्ति,
तत्ते पदं(म्) सङ्ग्रहेण प्रवक्ष्ये॥11॥

सर्वद्वाराणि संयम्य, मनो हृदि निरुध्य च।
मूर्ध्न्याधायात्मनः(फ्) प्राणम्, आस्थितो योगधारणाम्॥12॥

ओमित्येकाक्षरं(म्) ब्रह्म, व्याहरन्मामनुस्मरन्।
यः(फ्) प्रयाति त्यजन्देहं(म्), स याति परमां(ङ्) गतिम्॥13॥

अनन्यचेताः(स्) सततं(यँ), यो मां(म्) स्मरति नित्यशः।
तस्याहं(म्) सुलभः(फ्) पार्थ, नित्ययुक्तस्य योगिनः॥14॥

मामुपेत्य पुनर्जन्म, दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः(स्), संसिद्धिं(म्) परमां(ङ्) गताः॥15॥

आब्रह्मभुवनाल्लोकाः(फ्), पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय, पुनर्जन्म न विद्यते॥16॥

सहस्रयुगपर्यन्तम्, अहर्यद्ब्रह्मणो विदुः।
रात्रिं(यँ) युगसहस्रान्तां(न्), तेऽहोरात्रविदो जनाः॥17॥

अव्यक्ताद्व्यक्तयः(स्) सर्वाः(फ्), प्रभवन्त्यहरागमे।
रात्र्यागमे प्रलीयन्ते, तत्रैवाव्यक्तसञ्ज्ञके॥18॥

भूतग्रामः(स्) स एवायं(म्), भूत्वा भूत्वा प्रलीयते।
रात्र्यागमेऽवशः(फ्) पार्थ, प्रभवत्यहरागमे॥19॥

Learngeeta.com
LEARNGEETA

परस्तस्मात्तु भावोऽन्यो-ऽव्यक्तोऽव्यक्तात्सनातनः।
यः(स्) स सर्वेषु भूतेषु, नश्यत्सु न विनश्यति ॥20॥
अव्यक्तोऽक्षर इत्युक्तः(स्), तमाहुः(फ्) परमां(ङ्) गतिम्।
यं(म्) प्राप्य न निवर्तन्ते, तद्धाम परमं(म्) मम॥21॥
पुरुषः(स्) स परः(फ्) पार्थ, भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि, येन सर्वमिदं(न्) ततम्॥22॥
यत्र काले त्वनावृत्तिम्, आवृत्तिं(ञ्) चैव योगिनः।
प्रयाता यान्ति तं(ङ्) कालं(वँ), वक्ष्यामि भरतर्षभ॥23॥
अग्निर्ज्योतिरहः(श्) शुक्लः(ष्), षण्मासा उत्तरायणम्।
तत्र प्रयाता गच्छन्ति, ब्रह्म ब्रह्मविदो जनाः॥24॥
धूमो रात्रिस्तथा कृष्णः(ष्), षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं(ञ्) ज्योतिः(र्), योगी प्राप्य निवर्तते॥25॥
शुक्लकृष्णे गती ह्येते, जगतः(श्) शाश्वते मते।
एकया यात्यनावृत्तिम्, अन्ययावर्तते पुनः॥26॥
नैते सृती पार्थ जानन्, योगी मुह्यति कश्चन।
तस्मात्सर्वेषु कालेषु, योगयुक्तो भवार्जुन॥27॥
वेदेषु यज्ञेषु तपः(स्) सु चैव,
दानेषु यत्पुण्यफलं(म्) प्रदिष्टम्।
अत्येति तत्सर्वमिदं(वँ) विदित्वा,
योगी परं(म्) स्थानमुपैति चाद्यम्॥28॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां(यँ) योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नामाष्टमोऽध्यायः॥8॥

॥ॐ श्रीकृष्णार्पणमस्तु॥

- विसर्ग के उच्चार जहाँ (ख) अथवा (फ) लिखे गयें हैं, वह प्रत्यक्ष ख् अथवा फ् नहीं होते, उनका उच्चारण 'ख्' या 'फ्' के जैसा किया जाता है।
- संयुक्त वर्ण (दो व्यंजन वर्णों के संयोग) से पहले वाले अक्षर पर आघात (हल्का सा जोर) देकर पढ़ना चाहिये। '॥' का चिह्न आघात को दर्शाने हेतु दिया गया है।
- कुछ स्थानों पर स्वर के पश्चात् संयुक्त वर्ण होने पर भी अपवाद नियम के कारण आघात नहीं दिये गये हैं जैसे एक ही वर्ण के दो बार आने से, तीन व्यंजनों के संयुक्त होने से, रफार (उपर र्) या हकार आने पर आदि। जिन स्थानों पर आघात का चिह्न नहीं वहाँ बिना आघात के ही अभ्यास करें।



योगेशं(म्) सच्चिदानन्दं(वँ), वासुदेवं(वँ) व्रजप्रियम्।
धर्मसंस्थापकं(वँ) वीरं(ङ्), कृष्णं(वँ) वन्दे जगद्गुरुम्॥

*गीता परिवार साहित्य का उपयोग किसी अन्य स्थान पर करने हेतु पूर्वानुमति आवश्यक है।*
Learngeeta.com